यत्र शिल्पं सम्भूय कुर्वते। कर्मानुरूपं निर्वेशं लभेरंस्ते यथांशतः" इति। कुप्यं हेमरूप्यव्यतिरिक्तत्रपुसीसादिकम्। हेमरूप्ये इति प्रस्तुत्य ताभ्यां यदन्यत्तु कुप्यमित्यमरसिंहेनोक्तत्वात्। निर्वेशो भृतिः। कात्यायनोऽपि "शिक्षकाभिज्ञकुशला आचार्याश्चेति शिल्पिनः। एकद्वित्रिचतुर्भागान् हरेयुस्ते यथोत्तरम्" इति। हर्म्यादिनिर्मातॄणां मध्ये मुख्यस्य भागद्वयमाह बृहस्पतिः "हर्म्यं देवगृहं वापि वाटिकोपस्कराणि च। सम्भूय कुर्वतां तेषां प्रमुखो द्व्यंशमर्हति" इति। नर्त्तकेष्वपि मुख्यस्यांशद्वयभागित्वमतिदिशन् विशेषान्तरमाह स एव "नर्त्तकानामेष एव धर्मः सद्भिरुदाहृतः। तालज्ञो लभतेऽध्यर्द्धं गायनास्तु समांशिनः" इति। अध्यर्द्धम् अर्द्धाधिकमेकमंशम्। सम्भूयकारिणाञ्चौराणां लाभभागेऽंशपरिकल्पनाप्रकारमाह कात्यायनः "परराष्ट्राद्धनं यत् स्याच्चौरैः स्वाम्याज्ञया हृतम्। राज्ञे दशांशमुद्धृत्य विभजेरन् यथाविधि। चौराणां मुख्यभूतस्तु चतुरोऽंशांस्ततो हरेत्। शूरोऽंशांस्त्रीन् समर्थो द्वौ शेषास्त्वेकैकमेव च" इति। एतद्धनं दुर्बलवैरिदेशादाहृतविषयम् प्रबलवैरिदेशादाहृते त्वाह बृहस्पतिः "स्वाम्याज्ञया तु यच्चौरैः परदेशात् समाहृतम्। राज्ञे दत्त्वा तु षड्भागान् भजेयुस्ते यथांशतः। चतुरोऽंशान् भजेन्मुख्यः शूरस्त्र्यंशमवाप्नुयात्। समर्थस्तु हरेद् द्व्यंशं शेषास्त्वन्ये समांशिनः" इति। समर्थः शक्तः। एतेषां हानिरप्येवमेवेत्याह कात्यायनः "तेषां चेत् प्रसृतानाञ्च ग्रहणं समवाप्नुयात्। तन्मोक्षणार्थं यद्दत्तं वहेयुस्ते यथांशतः" इति। इयमंशपरिकल्पना ऋत्विग्भिन्नसम्भूयकारिणां समयाभावविषया कृते तु समये तदनुसारेणैव। अतएव तेनैवोक्तम् "वणिजां कर्षकाणाञ्च चौराणां शिल्पिनान्तथा। अनियम्यांशकर्तॄणां सर्वेषामेष निर्णयः" इति। अनियम्य लाभहान्योः समयेन प्रतिपुरुषमंशमकृत्वेत्यर्थः"।

**सम्भृति** स्त्री सम्+भृ--क्तिन्। सम्यक् पोषणे।

**सम्भेद** पु० संभिद्यते संश्लिष्यतेऽत्र सम्+भिद--आधारे घञ्। १नद्योः सङ्गमस्थाने अमरः। भावे घञ्। २सङ्गमे ३सम्यग्भेदने ४स्फुटने ५मिलने मेदि० ६ऐकरूप्ये च "सम्भेदे नान्यतरवैयर्थ्यम्" इति मीमांसायां न्यायः।

**सम्भोग** पु० सम्+भुज–घञ्। १सम्यग्भोगे २सुरते ३जिनशासनभेदे मेदि० ४हर्षे शब्दच० ५केलिनागरे जटा० "दर्शनस्पर्शनादीनि निषेवेते विलासिनौ। यत्रानुरक्तावन्योन्यं सम्भोगः स उदाहृतः" उक्तलक्षणे ६शृङ्गारस्यावस्थाभेदे सा०द०।

**सम्भ्रम** पु० सम्+भ्रम--घञ् न वृद्धिः। १भयादिजनिते वेगे अमरः। २त्वरायां ३तद्भेदे ४भये ५आदरे मेदि०। ७अतिशयभ्रमे ७स्तवे अजयः।

**सम्मति** स्त्री सम्+मन--क्तिन्। १अनुमतौ २अभिलाषे च मेदि०। ३आत्मज्ञाने अजयः। [२हर्षयुक्ते त्रि०।

**सम्मद** पु० सम्+मद-घञर्थे क। १हर्षे अमरः। कर्त्तरि अच्

**सम्मर्द** पु० संमृद्यतेऽत्र सम्+मृद--आधारे घञ्। १युद्धे। भावे घञ्। २अन्योन्यसंघर्षे च।

**सम्मातुर** पु० समीच्याः सत्या मातुरपत्यम् अण् उत् रपरः वा० न वृद्धिः। सतीतनये भद्रमातुरे हेमच०।

**सम्मान** पु० सम्+मन-घञ्। आदरे। [इते च।

**सम्मानित** त्रि० सम्+मन--णिच्-क्त। १कृतगौरवे २सम्मा-

**सम्मार्जन** क्ली सम्+मृज–ल्युट्। संशोधने रत्नमा०।

**सम्मार्जनी** स्त्री संमृज्यतेऽनया सम्+मृज--करणे ल्युट् ङीप्। धूल्याद्यपसारणार्थे पदार्थे (झाँटा) अमरः। ण्वुल्। सम्मार्जक तदर्थे पु० शब्दर०।

**सम्मित** त्रि० सम्+मा–क्त। १सदृशे २तुल्यपरिमाणे च जटा०

**सम्मुख** त्रि० सङ्गतं मुखं येन प्रा०ब०। अभिमुखागते त्रिका०।

**सम्मुखीन** त्रि० सम्मुखं पतति ख। अभिमुखे पातिनि।

**सम्मूर्च्छज** न० सम्मूर्च्छात् जायते जन-ड। तृणादौ हेमच०

**सम्मूर्च्छन** न० सम्+मूर्च्छ–ल्युट्। १सम्यग्विस्तारे अमरः। २उन्नतौ ३मोहे च मेदि०। ४सम्यक्मूर्च्छने स्वरभेदे।

**सम्मूर्जनोद्भव** पु० सम्मूर्जनादुद्भवति उद्+भू–अच् ५त०। मत्कुणे हेमच०।

**सम्मृष्ट** त्रि० सम्+मृज–क्त। १कृतमार्जने अमरः। मक्षिकाद्यपसारणेन २शोधितेऽन्नादौ च भरतः।

**सम्मोद** पु० सम्+मुद–घञ्। १हर्षे २प्रीतौ च शब्दच०।

**सम्यच्** अव्य० सम्+अन्च–क्विप् सम्यादेशः। १शोभने २सङ्गते ३मनोज्ञे च मेदि०। ४सत्यवाक्ये न० भरतः ५तदति त्रि० भत्वे समीच इत्यादि। स्त्रियां ङीप् समीची।

**सम्राज्** पु० सम्यक् राजते राज-क्विप् नानुस्वारः। कृतराजसूययज्ञे सर्वभूमीश्वरे नृपतौ अमरः।

**सय्यँम** पु० सम्+यम–करणे घञ् समो वा परसवर्णोऽनुनासिको यँः पक्षे संयमः। पात०सू० परिभाषिते धारणाध्यानसमाधित्रये "त्रयमेकत्र संयमः" पात०सू० "तदेतस्य